National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2016; 1(5): 24-26
© 2016 NJHSR
www.sanskritarticle.com
Received: 09-03-2016
Accepted: 10-03-2016

**ममता,**
शोध छात्रा, विशिष्टद्वैतविभागः,
दर्शनसंकायः,श्रीलालबहादुरशास्त्री
राष्ट्रियसंस्कृतविद्यापीठम्,
नवदेहली 110016

**Correspondence:**
**ममता,**
शोध छात्रा, विशिष्टद्वैतविभागः,
दर्शनसंकायः,श्रीलालबहादुरशास्त्री
राष्ट्रियसंस्कृतविद्यापीठम्,
नवदेहली 110016

# विशिष्टाद्वैतमते जीवात्मस्वरूपम्

**ममता**

दर्शनानि हि दैनन्दिनकार्यकारणादिव्यवहारात् सुव्यवस्थित प्रामाणिककार्य कारणादियुक्तसौख्यजीवनयापनोप युक्तमार्गविशेषानन्विशन्ति। विश्वदर्शनसमाजे भारतीयदर्शनानां प्राचीनत्वं श्रैष्ठयञ्च विद्वत्समाजविदितमेव। जागदिकपदार्थाः इन्द्रियगोचरास्तदितराश्चेति विभक्तुं शक्यते। इन्द्रियजन्यज्ञानानां कात्स्न्र्यविषयप्रकाशकत्वं न भवति इति सर्वसम्मतिः। इन्द्रियाणां देशकालवस्तु परिच्छिन्नवस्तुग्राहकस्वभावात्। प्रत्यक्षमेव प्रमाणं सकलजीवसमानं वेद्यम्। सामान्यतः प्रत्यक्षज्ञानाय शास्त्राणि नापेक्षन्ते, सर्वजीवसुलभत्वात् यत्रा प्रत्यक्षे लोकसिद्ध साम्यं न तत्र विप्रतिपत्तिः।

प्रत्यक्षमिव केषुचित् स्थलेषु च प्रत्यक्षप्रमाणस्याकिञ्चित्कारत्वमवगम्यते। तादृशस्थलेष्वनुमानादिप्रमाणापेक्षा भवति। अनुमानोपमानादिर्हि प्रत्यक्षप्रमाणसहकृतानि प्रमाणात्मकज्ञानसम्पादने समर्थानि। प्रत्यक्षवत् अनुमानादि सर्वाण्यपि प्रमाणानि सर्वजनानुभूयमानान्यपि ज्ञानसघङ्कोचजनिततारतम्ययुक्तानि भवन्ति। सम्पूर्णस्यापि ज्ञानराशेः प्रमाणाधीनत्वात् सुव्यवस्थितप्रामाणिकप्रमाणनिर्धरणे दार्शनिकाः प्रवर्तन्ते। तत्रापि प्रमाणसंख्या विप्रतिपत्तिः, स्वरूपविप्रतिपत्तिरित्याद्यनेकविवादास्पदा अद्याप्यनुवर्तन्ते। प्रत्यक्षादिप्रमाणगोचरपदार्थविवेचनवत् वेदादिशब्दराशिबलेनातीन्द्रिय- पदार्थस्वरूपादिज्ञापने शास्त्राणि प्रवर्तन्त इत्यप्यनुभूयते। सर्वाणि दर्शनान्यात्यन्तिकदुःखनिवृत्तये नित्यानन्दावाप्तये च प्रवर्तन्त इति तु साम्यम्।

भारतीयदर्शनान्यास्तिक-नास्तिकभेदेन द्विविधनि। तत्रा चार्वाक-जैन-बोद्धमतानि नास्तिकदर्शनानि, सांख्य-योग-न्याय-मीमांसा-वेदान्ताद्यास्तिकानि दर्शनानि कथ्यन्ते। वेदप्रामाण्यस्वीकारास्वीकारेण जनित एवायमास्तिकनास्तिकभेदः। आस्तिकाश्च सनातनं वेदं सर्वमूर्धन्यप्रमाणं समाद्रियन्ते। न तेषां वेदानां प्रामाण्यलेष इति नास्तिकाः। सामान्यतः सर्वेषां भारतीयदर्शनानां विचारबिन्दुरपि समानैव, यथात्मप्रकृति संसारमोक्षतदुपायादिविचाराः। तत्रेदं शोधपत्रं जीवात्मविषयकविप्रतिपत्तीः अधिकृत्य विचारयति।

## विशिष्टाद्वैतमते जीवस्वरूपम् –

अणुत्वे सति चैतन्यं, शेषत्वे सति चैतन्यमित्यादीनि जीवसामान्यलक्षणानि भवन्ति। जीवश्च देहेन्द्रियमनःप्राणधीभ्यो विलक्षणो भवति। 'मम शरीरम्' 'चक्षुषा पश्यामि' 'वाचा वदामि' 'मनसा जानामि' 'मम प्राणा' 'जानाम्यहमित्यादि' व्यावहारिकप्रतीत्यैव वैलक्षण्यं प्रतीयते। 'स्वरूपतोऽणुरपि' स्वधर्मभूतज्ञानव्याप्त्या युगपदनेकविषयानुभवभाग्भवति। **'उत्क्रान्तिगत्यागतीनाम्'**[1]**'स्वात्मनाचोत्तरयोः'**[2]**'नाणु रतच्छ्रुतेरिति चेन्नेतराधिकारात्'**[3] **'स्वशब्दोन्मानाभ्यां च'**[4] इत्यादिसूत्रैः जीवस्याणुस्वरूपत्वं सिद्धान्तितम्।

श्रुतयश्चोत्क्रान्त्यादिविषयाः-**'तेन प्रद्योतेनैव आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः'**[5] **'ये वै केचनास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति'**[6] **'तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे'**[7] साक्षादणुत्वप्रतिपादकश्रुतयश्च **'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चध संविवेश'**[8] **'बालाग्रशतभागस्य शतध कल्पितस्य च। भागो जीवः स विज्ञेयः'**[9] **'आरग्रमात्रो ह्यवराऽपि दृष्टः'**[10] पूर्वानुभूतार्थप्रतिसन्धनाच्चायं जीवो नित्यः। **'नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः'**[11] इत्यादिसूत्राण्यमुमर्थं सूचयति। अत्र श्रुतिप्रमाणानि-**'न जायते म्रियते वा विपश्चित्'**[12] **'ज्ञाज्ञौ द्वावजौ'**[13] **'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधति कामान्'**[14] **'अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।'**[15] अयं जीवः प्रतिशरीरं भिन्नः स्वयं प्रकाशश्च। तस्यैकत्वव्यवहारस्तु व्रीहिराशौ चेको व्रीहिरिति प्रतीतिवत् ज्ञानैकाकारतया भवति, न तु स्वरूपैक्यात्। स्वरूपतो ज्ञानानन्दस्वरूपोप्युपाध्विशात् संसरति। कर्तृत्वभोक्तृत्वशरीरित्वाशरीरत्वादयोऽस्य भवन्ति। जीवस्त्रिविधे बद्धमुक्तनित्यभेदाद् भवति।बद्धाश्च 'अनिवृत्तसंसाराश्चतुर्दशभुवनाण्डकटाहवर्तिनो ब्रह्मादिकीटपर्यन्ताश्चेतनविशेषाः'[16] भवन्ति।
बद्धजीवपरकश्रुतयश्च-

**'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः'** [17]

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वादवत्यनश्नन् चान्योऽभिचाकशीति ।।**[18]

स्वकुर्मानुगुणश्च बद्धजीवाः विविध्योनिप्रवेशभाजो भवन्ति। श्रुतयश्चात्र –

**'साधुकारी साधुर्भवति, पापकारी पापो भवति, पुण्यः पुण्येन कर्मणा पापः पापेन'**[19] **तद्येह रमणीयाचरणाभ्याशो ह यत्तो रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा सूकरयोनिं वा चाण्डालयोनिंवा ।'** [20]

बद्धश्च शास्त्रावश्यतदवश्यभेदेन द्विविधः। शास्त्रवश्याश्च करणायत्तज्ञानबद्धाः। तदितराः तिर्यक्स्थावरादयस्तदवश्याः। बुभुक्षुमुमुक्षुभेदेन शास्त्रवश्या द्विविधः। बुभुक्षुश्च त्रैवर्गिकपुरुषार्थनिष्ठो भवति। मोक्षपुरुषार्थनिष्ठश्च मुमुक्षुर्भवति। अर्थकामधर्मकामपराश्चेति बुभुक्षवो द्विविधः। देहात्माभिमानिनोऽर्थकामपराः, धर्मलक्षणलक्षितयज्ञदानतपस्तीर्थयात्रादिनिष्ठाश्च धर्मकामपरा भवन्ति। धर्मपराश्च देवतान्तरपरा भगवत्पराश्चेति द्विविधः। ब्रह्मरुद्राग्नीन्द्राधराधनपराः देवतान्तरपरा भवन्ति। आर्तजिज्ञासुरर्थार्थीत्युक्ताधिकारिणो भगवत्पराश्च भवन्ति। भक्ताः प्रपन्नाश्च मोक्षपरा भवन्ति।

भक्ताश्च **'पुनरधीतसांगसशिरस्कवेदाः पूर्वोत्तरमीमांसा परिचयाच्चिदद्विलक्षणानवधिकातिशयानन्दरूपं निखिलहेयप्रत्यनीकं समस्तकल्याणगुणात्मं ब्रह्मावधर्य तत्प्राप्युपायभूतां सांगा भक्तिं स्वीकृत्य तया मोक्षं प्राप्तुकामाः।'**[21] साध्यसाधनभक्तिभेदात् भक्तिद्वैविध्यं विद्यते। साध्नभक्तिनिष्ठा व्यासादयः। साध्यभक्तिनिष्ठाश्च नारदादयः। **'आकिञ्चन्यानन्यगतित्वधर्मविशिष्टो भगवन्तमाश्रितः प्रपन्नः।'**[22] प्रपन्नोऽपि त्रैवर्गिकपरो मोक्षपरश्चेति द्विविधः। एकान्तिपरमैकान्तिभेदात् प्रपन्नो द्विविधे दृप्तार्तभेदात् परमैकान्ती द्विविधः। मुक्तश्च- **'उपायपरिग्रहानन्तरं नित्यनैमित्तिकभगवदाज्ञानुज्ञाकैघङ्कर्यरूपाणि कर्माणि स्वयम्प्रयोजनतया कुर्वन् '** भगवद्भागवताचार्यापचारांश्च वर्जयन् देहावसानकाले सुकृतदुष्कृते मित्रामित्रयोर्निक्षिपन् वाघ्मनसीत्यादिप्रकारेण हार्दे परमात्मनि विश्रम्य मुक्तिद्वारभूतसुषुम्नानाडीं प्रविश्य तया ब्रह्मरन्ध्रान्निष्क्रम्य हार्देन साकं सूर्यकिरणद्वाराऽग्निलोकं गत्वा दिनपूर्वपक्षोत्तरायणसंवत्सराद्यभिमानिदेवताभिर्वायुना च पथि सत्कृतः सूर्यमण्डलं भित्वा रथचक्ररन्धद्वारा सूर्यलोकं गत्वाऽनन्तरं चन्द्रविद्युद्वरुणेन्द्रप्रजापतिभिर्मार्गप्रदर्शिभिरातिवाहिकैर्गणैस्सह सोपचारं तत्तल्लोकानतीत्य प्रकृतिवैकुण्ठसीमापरिच्छेदिकां विरजां तीर्त्वा सूक्ष्मशरीरं विहाय अमानवकरस्पर्शादप्राकृतादिव्यविग्रहयुक्तश्चतुर्भुजो ब्रह्मालंकारेणालङ्कृतः इन्द्रप्रजापतिसंज्ञाकनगरद्वारपालाभ्यनुज्ञया श्रीवैकुण्ठाख्यं दिव्यनगरं प्रविश्य पताकालङ्कृतदीर्घप्राकारसहितगोपुरमतीत्य ऐरम्मदाख्यामृतसरस्सोमसवनाख्याश्वत्थं च दृष्ट्वा, शतं मालाहस्ता इत्याद्युक्तपञ्चशतदिव्याप्सरोगणैरूपचारितो ब्रह्मगन्धदिभिरलघ्कृतास्तत्रानन्तगरुडविष्वक्सेनादीन् प्रणम्य तैर्बहुमतो महामणिमण्डपमासाद्य पर्यङ्कसमीपे स्वाचार्यान् प्रणम्य पर्यङ्कसमीपं गत्वा तत्र धर्मादिपीठोपरि कमलेऽनन्ते विमलादिभिश्चामरहस्ताभिस्सेव्यमानं श्रीभूमिनीलासमेतं शघ्खचक्रादिदिव्यायुधेपेतं जाज्वल्यमानकिरीटमुकुटचूडावतंसमकरकुण्डलग्रैवेयकहारकेयूर कटकश्रीवत्सकौस्तुभमुक्तादामोदरबन्धपीताम्बरकाञ्चीगुणनुपूराद्यपरिमितिदिव्य भूषणैर्भूषितमपरिमितोदारकल्याणगुणसागरं भगवन्तं दृष्ट्वा तत्पादारविन्दयुगलं शिरसा प्रणम्य पादेन पर्यङ्गमारुह्य तेन स्वाङ्के स्थापितः कोऽसीति पृष्टो ब्रह्मप्रकाराऽस्मीत्युक्ता तेन कटाक्षितस्तदनुभवजनितप्रहर्षप्रकर्षात्सर्वदेशसर्वकालसर्वावस्थोचितसर्वकैङ्कर्यकरतिराविर्भूतगुणाष्टक उत्तरावधिरहितब्रह्मानुभववान् यः स मुक्त इत्युच्यते।[23] नित्यसूरयश्च कदचिदपि भगवदभिमतविरुद्धाचरणाभावेन ज्ञानसंकोचप्रसङ्गरहिता अनन्तगरुडविष्वक्सेनादयः।

## निष्कर्षः -

शोधपत्रेणानेन ज्ञायते यत् सर्वाण्यपि दर्शनान्यत्र विमर्शितानि जीवानां सद्गतिरवाप्तय एव प्रवर्तन्ते। प्राप्यस्य ब्रह्मणो रूपं, प्राप्तुश्च प्रत्यगात्मनः, प्राप्त्युपायं पफलं चैव तथा प्राप्तिविरोधि च इत्यर्थपञ्चकानुगुणं जीवस्वरूपज्ञानस्यात्यन्तापेक्षितत्वात् तज्ज्ञानं च मोक्षोपकारकम्। जीवस्य स्वरूपविवरणे विभ्वणुवादिविचारबाहुल्यऽपितस्य चैतन्यस्वरूपस्वीकारे न दार्शनिकानां विप्रतिपत्तिः इत्यवेवं प्रकारेण भारतीयदर्शनेषु केषाञ्चिद्दर्शनानां जीवस्वरूपनिरूपणप्रकारो विमर्शितः।

1. ब्रह्मसूत्रम् - 2/3/20
2. तत्रैव - 2/3/21
3. तत्रैव - 2/3/22
4. तत्रैव - 2/3/23
5. बृहदारण्यकोपनिषद् - 6/4/2
6. कौषीतक्युपनिषत् - 1/2
7. बृहदारण्यकोपनिषद् - 6/4/6
8. मुण्डकोपनिषत् - 3/1/9
9. श्वेताश्वतरोपनिषत् - 5/9
10. तत्रैव - 5/8
11. ब्रह्मसूत्रम् - 2/3/18
12. कठोपनिषत् - 2/18
13. श्वेताश्वतरोपनिषत् - 1/9
14. तत्रैव - 6/13
15. कठोपनिषत् - 2/18
16. यतीन्द्रमतदीपिका अष्टमोऽवतारः।
17. मुण्डकोपनिषत् - 3/1/2
18. मुण्डकोपनिषत् - 3/1/1
19. बृहदारण्यकोपनिषत् - 4/4/5
20. छान्दोग्योपनिषद् - 5/10/7
21. यतीन्द्रमतदीपिका अष्टमोऽवतारः।
22. यतीन्द्रमतदीपिका अष्टमोऽवतारः।
23. यतीन्द्रमतदीपिका अष्टमोऽवतारः।

## सन्दर्भ ग्रन्थ सूची :–


1. उपनिषत्संग्रहः, मोतीलाल बनारसीदास, दिल्ली, 1984.
2. तर्कसंग्रहः, अन्नभट्टः, सं.-अथल्ये-बोडासः, भण्डारकर ओरियण्टल रिसर्च इंस्टीट्यूट, पूना, 1968.
3. यतीन्द्रमतदीपिका, वाधूल श्रीनिवासाचार्यः, श्रीरंगजी मन्दिरम्, वृन्दावनम्, 1976.
4. सर्वदर्शनसंग्रह, माधवाचार्यः, चैखम्भा विद्याभवनम्, वाराणसी, 2004.
5. संस्कृत वाङ्मय का बृहद् इतिहास, प्र.सं.- श्रीबलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान, लखनऊ, वि. सं. 2052.
6. सांख्यकारिका, ईश्वरकृष्णः, सं.-आद्याप्रसादमिश्रः, अक्षयवट प्रकाशन, इलाहाबाद, 2007, वि. संवत्।
7. सांख्ययोगदर्शनम्, गोस्वामिदामोदरशास्त्रिणा, चैखम्भा संस्कृत भवन, वाराणसी, प्रथम संस्करण, 1935.